पीएम श्री केंद्रीय विद्यालय सीतापुर प्रथम पाली

द्वितीय सावधिक परीक्षा (सत्र:**2025-26)**

विषय-संस्कृत कक्षा सप्तमी

नाम पूर्णांक - 40

कक्षा एवं वर्ग अवधि - 1:30

अनुक्रमांक दिनांक-

<u>खंड 1 अपठित अवबोधनम्</u>

प्रश्न 1. अधोदत्तम् अनुच्छेदं पठत प्रश्नान् च उत्तरत-(नीचे दिए गए प्रत्येक अनुच्छेद को पढ़िए और प्रश्नों के उत्तर दीजिए-)

नदी-तीरे अस्ति एकः वट-वृक्षः। एकः अल्पज्ञः बालकः तस्य छायायाम् उपविष्टः। पश्यतिएकस्याम् लतायाम् विशालानि कालिन्द-फलानि सन्ति । सः चिन्तयति-अहो विचित्रम्! सुकोमलायाम् लतायाम् दीर्घानि फलानि, विशाले वट-वृक्षे च लघूनि पुष्पाणि सन्ति । नूनम् एव ईश्वरः मन्दमतिः मूर्खः च। एवम् चिन्तयन् सः वृक्षस्य अधः तिष्ठति स्म। तदैव एकम् सुकोमलम् पुष्पम् तस्य शिरसि पतति। सः विचारयति-यदि एतस्मिन् वृक्षे विशालम् फलम् स्यात् तर्हि अद्य मे शीर्षम् भग्नम् भवेत्। सौभाग्येन अहम् सकुशलः अस्मि। ईश्वरः यत् करोति शोभनं करोति। ननु मूर्खः अहम्, न तु ईश्वरः।

I. एकपदेन उत्तरत- ½×4=2

1. वटवृक्षः कुत्र अस्ति? ..............................

2. विशालानि फलानि कस्याम् सन्ति ? .............................

3. वटवृक्ष कीदृशानि पुष्पाणि? ................................

4. बालकः कीदृशः अस्ति? ................................

II. एकवाक्येन उत्तरत. 2×1=2

अन्ततः बालकस्य ईश्वरविषये किं मतम् ?

उत्तरम्: ........................................................................

..............................................................................

<u>खंड 2 रचनात्मकं कार्यं</u>

प्रश्न 2. अधः प्रदत्तेषु रिक्तस्थानेषु तृतीया – विभक्त्यन्तानि रूपाणि लिखन्तु । 1×5=5

क) अहं मम ……………………. (खड्ग) स्तम्भं भक्ष्यामि ।

(ख) प्रह्लादः गजस्य ……...............… (पददलन) अपि जीवति ।

(ग) सर्वे जनाः …...............…… (नारायण) अनुगृहीताः ।

(घ) अहं …...............….. (निजनख) तव वक्षःस्थलं विदीर्य मारयिष्यामि ।

(ङ) बालिकाः ……………… (शिक्षिका) सह चर्चां कुर्वन्ति ।

प्रश्न 3. उदाहरणानुसारम् अधः रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु 1×5=5

(क) साधोः विद्या ज्ञानाय भवति ।

उत्तरम्: ________________________________

(ख) विद्या गुरूणां गुरुः ।

उत्तरम्: ________________________________

(ग) विद्याहीनाः न शोभन्ते ।

उत्तरम्: ________________________________

(घ) ते मर्त्यलोके भुवि भारभूताः भवन्ति ।

उत्तरम्: ________________________________

(ङ) सर्वस्य लोचनं शास्त्रम् ।

उत्तरम्: ________________________________

अनुप्रयुक्त व्याकरणम्

प्रश्न 4. उदाहरणानुसारम् अधोलिखितेषु वाक्येषु रेखाङ्कित पदानां विभक्तिं निर्दिशन्तु । 1/2x 6 =3

1) माता भूमिः पुत्रोऽहं पृथिव्याः । ..................................

(ख) गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः। ....................

(ग) शीलं परं भूषणम्। ..............................

(घ) क्षणशः कणशश्चैव विद्याम् अर्थ च साधयेत् । ........................

(ङ) सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् । ....................

(च) हितं मनोहारि च दुर्लभं वचः । ..........................

प्रश्न 5. उदाहरणानुसारं संयोज्य लिखन्तु । 1×5=5

क) रमा + ईश: = रमेशः

(ख) सुर + ईश्वरः = .............…………

(ग) नाग + इन्द्रः = .............…………

(घ) गज + इन्द्रः = .............…………

(ङ) माता + इव = ……..........…………

(च) राम + इति = ………………………

<u>खंड 4 पठित अवबोधनम्</u>

प्रश्न 6. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

(हिरण्यकशिपोः सभा)

राजभटः – अयि भोः सावधानाः तिष्ठन्तु । राजाधिराजः राजगम्भीरः त्रैलोक्याधिपतिः देवाधिदेवः दैत्यराजः हिरण्यकशिपुः आगच्छति।

सभासदः – विजयतां महाराज! विजयताम्। विजयतां महाराज! विजयताम्।

हिरण्यकशिपुः – ह ह ह . ह …… (अट्टहासेन सह) अहम् एव सर्वशक्तिमान् अस्मि । अहम् अमरः अस्मि ।

मन्त्री — सत्यं दैत्यराज! सुराः असुराः यक्ष-गन्धर्व – किन्नराः भवतः सर्वे भीताः तिष्ठन्ति ।

दैत्यपुरोहितः – भगवन्! देशे सर्वत्र भवतः एव पूजा भवति। अन्यदेवतानाम् पूजाराधनम् न भवति। इतः परं यज्ञभागादिकम् अपि देवेभ्यः न दास्यन्ति ।

हिरण्यकशिपुः – साधु साधु । अयि भोः मन्त्रिन् ! सर्वत्र जनाः मामेव ध्यायन्ति खलु !

मन्त्री – देव! सर्वत्र भवतः एव नामकीर्तनं भवति, किन्तुअधोमुखः मौनं तिष्ठति ।)

हिरण्यकशिपुः – (सक्रोधम्) आ जानामि जानामि । भवान् मम पुत्रस्य विषये वक्तुम् इच्छति खलु।

मन्त्री – (मन्दध्वनिना) सत्यं देव !

हिरण्यकशिपुः – मम पुत्रकः एव मम शत्रुः अस्ति । कुलकलङ्कः सः प्रह्लाद : अहर्निशं मम शत्रोः हरेः गुणगानं करोति ।

I. एकपदेन उत्तरत। 1×2=2

(i) हिरण्यकशिपोः : शत्रुः कः अस्ति ? ………………………

(ii) त्रैलोक्याधिपतिः कः अस्ति ? ………………………

II. पूर्णवाक्येन उत्तरत। 2×1=2

(i) के सर्वे भीताः तिष्ठन्ति ?

उत्तरम्: ______________________________

III. भाषिककार्यम् । 1×2=2

(i) " दैत्यराज हिरण्यकशिपुः " अत्र विशेषणपदं किं अस्ति ?

(क) दैत्यराजः (ख) हिरण्यः (ग) कश्यपः

(ii) 'सर्वे भीताः तिष्ठन्ति' अत्र क्रियापदं किं आगतम् ?

(क) भीताः (ख) सर्वे (ग) तिष्ठन्ति

प्रश्न 7. अधोलिखितं पद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत।

विद्या विवादाय धनं मदाय

शक्तिः परेषां परिपीडनाय ।

खलस्य साधोर्विपरीतमेतत

ज्ञानाय दानाय च रक्षणाय ॥

I. एकपदेन उत्तरत।  1×2=2

(i) साधोः शक्तिः किमर्थं भवति ? ........................

(ii) कस्य धनं दानाय भवति ? ..........................

II. पूर्णवाक्येन उत्तरत।  2×1=2

(i) कस्य विद्या ज्ञानाय भवति ?

उत्तर: ............................................................... .

प्रश्न 8. यत्र अग्रे स्वरः अस्ति तत्र अनुस्वारस्य स्थाने 'म्' लिखित्वा वाक्यानि पुनः लिखन्तु - 1×4=4

(कं) न रत्नं अन्विष्यति ।

उत्तरः ......................................

(ख) शरीरं आद्यं खलु धर्मसाधनम् ।

उत्तरः ......................................

(ग) वयं अद्यतनं पाठं पठामः ।

उत्तरः. ......................................

(घ) त्वं अस्माकं गृहं आगच्छ।

उत्तरः ......................................

प्रश्न 9.अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति वदन्तु लिखन्तु च।  1×4 = 4

क) किं वयं पृथिव्याः पुत्राः पुत्र्यः च स्मः ? …………..........

(ख) किं रत्नम् अन्विष्यति ? …………...........

(ग) किं शीलं श्रेष्ठम् आभूषणम् अस्ति ? …………..........

(घ) किं शरीरम् आद्यं धर्मसाधनम् ? …………..........